

॥ शारदास्तोत्रम् ॥

श्रीमत्परमहंसेत्यादिसमस्तविरुदाङ्कित श्रीजगद्गुरु शृङ्गगिरि

श्रीसच्चिदानन्दशिवाभिनव

नृसिंहभारतीस्वामिभिः

शृङ्गपुर्यां श्रीशारदासन्निधौ नवरात्र्युत्सवसमये

विरचितम् ।



श्रीरङ्गस्थ

श्रीवाणीविलासमुद्रायन्त्रालये

संमुद्रितम् ।

१९०८.

Copyright Registered.

॥ श्रीः ॥

॥ शारदास्तोत्रम् ॥

रत्नावलीनिर्मितशैलशृङ्ग-
विभ्राजदापूर्णसुधाकराभम् ।
आकण्ठरक्ताम्बरसंवृताङ्ग्या
मुखाम्बुजं भाति जगज्जनन्याः ॥ १ ॥

आकण्ठमानम्रजनानुरागो
ममेति लोकस्य विबोधनाय ।
आकण्ठरक्ताम्बरसंवृताङ्गी
पद्मोत्थजाया प्रविभाति नूनम् ॥ २ ॥

एवं सर्वजगन्त्य-
युत्सङ्गे संनिधाय रक्षामि ।
इति बोधनाय जगता-
मङ्के बालं दधासि मातस्त्वम् ॥ ३ ॥

स्थालीपुलाकाख्यनयेन मात-
र्जगन्ति सर्वाण्यपि पालयामि ।
इत्येतदर्थस्य विबोधनाय
बालं निजाङ्के विदधासि किं त्वम् ॥ ४ ॥

आकर्षति यथायांसि
ह्ययस्कान्तमणिर्द्रुतम् ।
तथैव त्वन्मुखाम्भोजं
नतचित्तानि शारदे ॥ ५ ॥

भवन्तु विजरामराः पदसरोजनम्रा इति
प्रकृष्टदयया विधेः सखि सरोजतुल्यानने ।
करस्थकलशामृतं नतजनाय दातुं स्वयं
महार्हमणिनिर्मितं चषकमम्ब धत्से किमु ॥ ६ ॥

हंसोऽप्यहंस इति बोधमवाप्य मुक्तिं
प्राप्तः परस्तव पदाम्बुजसंश्रयाद्यत् ।
तस्मात्तवाम्ब पदयुग्ममयं मुमुक्षु-
र्हंसः समाश्रयति वाहनतामवाप्य ॥ ७ ॥

विरिञ्चिहृदयाम्बुजप्रमददानसूर्यप्रभे
विचित्रगतिचातुरीप्रथितपादपङ्केरुहे ।
करोति किमयं सदा गमनचातुरीप्राप्तये
मरालकुलनायकस्तव पदाब्जसेवां मुदा ॥ ८ ॥

अक्षीणो नतचित्तसंस्थिततमोनिर्वापणेऽपि क्षम-
श्चाङ्केनाप्ययुतस्तवास्यरजनीनाथो गिरां देवते ।
क्षीणेनाङ्कयुजा बहिःस्थिततमोमात्रापनोदक्षमे-
णाब्जेनायमहो कथं स लभतां साम्यं जगन्मातृके ॥

पशुपः शिवोऽयमिति तं
विहाय किं वाक्कृतिप्रदामाशु ।
पशुतानिवृत्तयेऽयं
वृषभस्त्वां सेवते मातः ॥ १० ॥

नीलकण्ठस्य सार्वज्ञ-
मूलं त्वत्पादसेवनम् ।
इति संबोधयन्नील-
कण्ठस्त्वां सेवते किमु ॥ ११ ॥

किं वर्णयामि तव सुन्दरतां मनुष्यो
यत्सुन्दरत्वमभिवीक्ष्य मयूरपक्षी ।
हित्वा विरूप इति षण्मुखमाशु मात-
र्वासं करोति तव पादसरोजमूले ॥ १२ ॥

दृष्ट्वा त्वदीयकचसंततिनीलमेघं
सर्वर्तुपूदयनमेत्य मयूर एषः ।
नित्यप्रहर्षदतया विरहासहिष्णु-
र्नूनं त्वदङ्घ्रिनिकटे स्थितिमातनोति ॥ १३ ॥

केकातोऽपि मनोहरेण वचसा त्वन्निर्जितः केक्ययं
पादाम्भोजयुगं प्रपन्न इति मच्चित्ते विभात्यम्बिके ।
जेतुः पादयुगप्रपत्तिरथवा देशान्तरावस्थिति-
र्युक्तं चान्यतरज्जितस्य विबुधाः प्राहुर्यतो भारति ।

आगत्य कालाहिधिया हि वेणीं
गृहीतुकामः खगराण्णिरीक्ष्य ।
निह्नोतुमिच्छत्ययमम्ब नैजां
भ्रान्तिं त्वदङ्घ्रेः परिसेवनात्किम् ॥ १५ ॥

आद्या मत्स्यमयी तनुर्मधुरिपोः कौर्मं द्वितीयं वपु-
स्तद्युग्मं त्वमिहाम्ब नेत्रपदयोर्व्याजेन धत्से यतः ।
तस्माच्चक्रयुगं तवोरसि कुचव्याजेन भात्यम्बिके
तस्मादेव खगेश्वरश्च सततं त्वां सेवते मोदतः ॥ १६ ॥

पुरा तव पदाम्बुजं हरिण एष संपूज्य यो
जगत्प्रभुशिरःस्थिते शशिनि संस्थितिं प्राप्तवान् ।
किमद्य हृदि संस्मरन् तव पदाब्जसेवाफलं
महोत्सवदिदृक्षया चरणसंनिधिं प्राप्तवान् ॥ १७ ॥

धत्ते कुरङ्गं विधुरेष पूर्णो
मदास्यचन्द्रस्तमधः करोति ।
इत्येतयोर्भेदविबोधनाय
कुरङ्गमम्ब त्वमधः करोषि ॥ १८ ॥

वने जातः सिंहः पुनरपि दरीवासनिरतः
स्वसाम्यं यत्र स्यात्सततवसतिं तत्परिसरे ।
चिकीर्षन्भ्रान्त्वा किं तव पदवनेजे नतमनो
गुहावासे दृष्ट्वा वसतिमकरोत्तत्परिसरे ॥ १९ ॥

तवाम्बराभावशशीयशृङ्ग-
नीकाशमध्यत्वमयं निशम्य ।
वलग्नकाश्यर्याध्ययनाय किं वा
पदाब्जसेवां विदधाति सिंहः ॥ २० ॥

भक्ताज्ञानमहेभा
मद्वाहनसंनिरीक्षणादेव ।
निर्यान्त्विति सहसा किं
सिंहं वाहं करोषि मातस्त्वम् ॥ २१ ॥

नताय पादाम्बुजयोर्जनाय
राजाधिराजत्वविधित्सया त्वम् ।
सिंहासनं त्वं वद दातुमम्ब
सिंहं सदा संनिधिगं करोषि ॥ २२ ॥

तुरङ्गवच्चञ्चलमम्ब चित्तं
बद्ध्वा दृढं भक्तिगुणेन शीघ्रम् ।
स्थिरं करोमीति गुणैस्तुरङ्गं
नियम्य किं बोधयसे जनांस्त्वम् ॥ २३ ॥

त्वमश्वपूर्वां श्रियमानताय
ददामि तूर्णं त्विति बोधनाय ।
तुरङ्गमग्रे विदधासि मात-
रितीव मन्ये वद किं तदेव ॥ २४ ॥

श्वो वाहनतां न याति दिविषद्वृन्दस्य वेदा इति
प्राहुस्तं निशमय्य रोषसहितस्त्वत्सन्निधिं प्राप्य किम् ।
मिथ्या कर्तुमहो तदीयवचनं देव्यास्तवाम्बानिशं
वाहत्वं कुतुकी जगाम तुरगाधीशो गिरां देवते ॥ २५ ॥

मम कौशिकवाहनता
स्याद्धर्यश्वस्य सेवने किमिति ।
शुक्लेभस्तव वाहः
समभून्मातर्न संदेहः ॥ २६ ॥

केचित्प्राहुरनैपुणास्तु कुचयोः साम्यं हि कुम्भस्थले
शुण्डायामथवोरुतौल्यमिभराडिच्छंस्तवागादिति ।
नैतत्संभविता तनौ कठिनता यस्मात्ततः शारदे
मध्ये ह्युत्सवसेवनाय हरिणा संप्रेषितः स्यादिति ॥ २७ ॥

एकं शरीरं परिगृह्य पूर्व-
भवे शुकोऽयं कृतवान् विचारम् ।
मोक्षाय नालं स इतीह देह-
द्वयं गृहीत्वा किमु सेवते त्वाम् ॥ २८ ॥

क्षुधातुरः कश्चन कीरडिम्भ-
स्तृषार्दितोऽन्यश्च तयोर्हि मातः ।
एकस्तु कर्णोत्पलमत्तुमिच्छ-
त्यन्यः करस्थामृतपानकामः ॥ २९ ॥

मां द्रष्टुमाकाशगतं हि मर्त्या
वक्त्रोन्नतेः क्लेशयुता भवेयुः ।
इतीव मत्वा धरणीं गतोऽय-
मम्बास्यलक्ष्यात्तव पूर्णचन्द्रः ॥ ३० ॥

एकापि नानाविधरूपधर्त्री-
त्येतादृशार्थस्य विबोधनाय ।
वेण्यां भुजङ्गी नयने कुरङ्गी
मध्ये च सिंही प्रतिभासि किं त्वम् ॥ ३१ ॥

मुक्ताहारमिषाज्जगज्जननि ते सेवां करोत्यादरा-
देवानां सरिदित्यहो मकरराडालोच्य सेवां स्वयम् ।
कर्तुं हारमिषेण कम्बुसदृशे कण्ठे विभातीति म-
च्चित्ते भाति पुनर्वदन्तु चतुराः किं तं न जानाम्यहम् ॥

श्रुत्वा तवाम्ब निनदं किल कीरडिम्भः
कण्ठे तवास्ति शुक इत्ययमाकलय्य ।
इच्छन् विनिर्गमनमस्य बहिस्तवाद्य
हस्ताम्बुजे स्थिरतया वसतीति मन्ये ॥ ३३ ॥

दन्तेषु किं दाडिमबीजबुद्धया
तवाधरे बिम्बधियाथवायम् ।
शुकः कुतस्त्वन्निकटे चकास्ति
संदेहयुक्ताय वदाशु मातः ॥ ३४ ॥

चन्द्रः सौहार्दमिच्छंस्तव मुखशशिना प्राप्य वृद्धिं वलक्षे
पक्षे प्राप्येषदम्ब प्रहृषितहृदयश्चाभवत्पूर्णिमायाम् ।
दृष्ट्वाथ त्वन्मुखेन्दुं मृगशिशुरहितं स्वं च चिह्नेन युक्तं
लज्जायुक्तस्ततोऽयं प्रतिदिवसमहो क्षीणतां याति कृष्णे ॥

कम्बौ पद्मं भाति बिम्बं हि तस्मिन्
मल्लीपङ्क्तिश्चापि नीलोत्पले द्वे ।
सर्वं ह्येतद्भाति हैम्यां लतायां
शैले चास्मिन् पश्यतैतद्विचित्रम् ॥ ३६ ॥

देवानामनिमेषताद्य सफला जाता तवाम्बानिशं
वक्त्राब्जस्य निरीक्षणात्सुरपतेस्तद्वत्सहस्राक्षता ।
गौरीशस्य दशाक्षता कमलजस्याष्टाक्षता भारति
क्रौञ्चारेर्द्विषडक्षतापि फलयुग्जातेति जानीमहे ॥३७॥

चन्द्रश्चकोरालिमयं करैः स्वैः
करोति तृप्तां सितपक्ष एव ।
तवास्यचन्द्रस्तु नमच्चकोरान्
करोति मातः सततं हि तृप्तान् ॥ ३८ ॥

अस्याब्जस्य समाश्रये मम भवेन्मोदो रजन्यां परं
नैवाह्नीत्यत एव चम्पकसुमेनालोच्य नीलोत्पले ।
सेवेते तव वक्त्रपद्ममनिशं नेत्रापदेशान्मुदा
रात्रौ वासरमध्यमेऽपि सुखदं वाग्देवि न द्वापरः ॥

तवास्यलक्ष्याद्धरणीं गतस्य
सुधांशुबिम्बस्य निषेवणाय ।
मुक्तासराणां मिषतः समागा-
त्तारातितिर्वाग्जननीति मन्ये ॥ ४० ॥

अशक्नुवन् स्तोतुमहीश्वरस्त्व-
न्मुखस्य सौन्दर्यमयं जगाम ।
रसातलं वक्त्रसहस्रतां च
निनिन्द कंजातभवस्य जाये ॥ ४१ ॥

दृष्टं वाग्देवताया वदनसरसिजं येन भूमौ कदाचि-
च्छृङ्गाद्रौ तस्य वक्त्रात्सरसपदयुतावाक्तितिर्निःसरेद्धि ।
नीहाराद्रेर्गुहातः सुरवरतटिनी यद्वदाश्वप्रयत्ना-
न्निर्गच्छत्येव तद्वन्नहि खलु विशयोऽस्माकमत्रास्ति कश्चित् ॥

अशक्नुवन्तस्तव सुन्दरत्वं
स्तोतुं महेशाग्निभवाब्जजाताः ।
निनिन्दुरास्येषु हि पञ्चकत्वं
षट्त्वं चतुष्कं च गिरां सवित्रि ॥ ४३ ॥

किं तत्पयोजयुग्मे
रम्भास्तम्भौ ततो व्योम ।
तत्र सरः सशलाकं
तदुपरि शैलौ ततः पयोजातम् ॥ ४४ ॥

दृष्टं वाग्देवते ते सरसिजयुगलं पादयुग्मं हि रम्भा-
स्तम्भावूरुद्वयं तत्तदुपरि गगनं मध्यभागो हि नूनम् ।
मन्ये नाभिः सरः स्यात्तदुपरि कलये रोमपङ्क्तिं शलाकां
शैलद्वन्द्वं कुचौ स्यात्तदुपरि कमलं त्वास्यमेवेति जाने ॥

निर्गत्य शैलमध्या-
त्कुहरं काचिद्गता भुजगी ।
तां शंसन्ति हि सुधियो
मातस्तव नाभिरोमालिम् ॥ ४६ ॥

सरस्या जातेयं न हि खलु कलिन्दाख्यगिरितः
समुद्रं नो याता ह्यपि तु वरशैलद्वयगता ।
विभातीत्थं काचित्त्वयि खलु गिरां देवि यमुना
वदन्त्येनां नाभिप्रसृततनुजालीं कविवराः ॥ ४७ ॥

अनायासादास्यादमरतटिनीपूरसदृशी
तति र्वाचामाशु प्रसरति शिशोरप्यनुदिनम् ।
कृपालम्बापाङ्गे कृशतरवलग्नेऽकृशकुचे
न संदेह्यत्राहं सरसिजभवप्राणदयिते ॥ ४८ ॥

नीलोत्पलोत्थः खलु नीलमेघो
नम्रास्यमध्यात्कविताप्रवाहम् ।
प्रवर्तयत्याशु वदन्ति चैनं
मातस्तवाक्षिप्रभवं कटाक्षम् ॥ ४९ ॥

नीलोत्पले त्वन्नयने हि मात-
स्तदुत्थमेघः करुणाकटाक्षः ।
स नम्रवक्त्रात्कविताप्रवाहं
प्रवर्तयत्याशु न संशयोऽत्र ॥ ५० ॥

अशक्नुवन्तस्तव सुन्दरत्वं
स्तोतुं महेशाग्निभवाब्जजाताः ।
निनिन्दुरास्येषु हि पञ्चकत्वं
षट्त्वं चतुष्कं च गिरां सवित्रि ॥ ४३ ॥

किं तत्पयोजयुग्मे
रम्भास्तम्भौ ततो व्योम ।
तत्र सरः सशलाकं
तदुपरि शैलौ ततः पयोजातम् ॥ ४४ ॥

दृष्टं वाग्देवते ते सरसिजयुगलं पादयुग्मं हि रम्भा-
स्तम्भावूरुद्वयं तत्तदुपरि गगनं मध्यभागो हि नूनम् ।
मन्ये नाभिः सरः स्यात्तदुपरि कलये रोमपङ्क्तिं शलाकां
शैलद्वन्द्वं कुचौ स्यात्तदुपरि कमलं त्वास्यमेवेति जाने ॥

निर्गत्य शैलमध्या-
त्कुहरं काचिद्गता भुजगी ।
तां शंसन्ति हि सुधियो
मातस्तव नाभिरोमालिम् ॥ ४६ ॥

सरस्या जातेयं न हि खलु कलिन्दाख्यगिरितः
समुद्रं नो याता ह्यपि तु वरशैलद्वयगता ।
विभातीत्थं काचित्त्वयि खलु गिरां देवि यमुना
वदन्त्येनां नाभिप्रसृततनुजालीं कविवराः ॥ ४७ ॥

अनायासादास्यादमरतटिनीपूरसदृशी
ततिर्वाचामाशु प्रसरति शिशोरप्यनुदिनम् ।
कृपालम्बापाङ्गे कृशतरवलग्नेऽकृशकुचे
न संदेह्यत्राहं सरसिजभवप्राणदयिते ॥ ४८ ॥

नीलोत्पलोत्थः खलु नीलमेघो
नम्रास्यमध्यात्कविताप्रवाहम् ।
प्रवर्तयत्याशु वदन्ति चैनं
मातस्तवाक्षिप्रभवं कटाक्षम् ॥ ४९ ॥

नीलोत्पले त्वन्नयने हि मात-
स्तदुत्थमेघः करुणाकटाक्षः ।
स नम्रवक्त्रात्कविताप्रवाहं
प्रवर्तयत्याशु न संशयोऽत्र ॥ ५० ॥

विराजते कञ्चन वारिराशि-
मीनेन युक्तो न हि कम्बवोऽत्र ।
कम्बूपरिस्थस्त्वयमेव मातः
सनेत्रमास्यं तव चैनमाहुः ॥ ५१ ॥

भुजगी वा तव वेणी
किं वा करपद्मपुष्परसलोभात् ।
आगतमधुलिट्पटली
जानीमो नैव विधिकान्ते ॥ ५२ ॥

के वा न कुर्युर्भुवि काव्यमम्ब
शब्दार्थविज्ञानयुजश्चिराय ।
चित्तं त्वदङ्घ्रिं परिसेवते यो
जयेत्स वाचस्पतिमाशु वाग्भिः ॥ ५३ ॥

यं देववर्याः समुपासते हि
तं देहिनामिष्टदमाशु मातः ।
मन्देतराप्यं सुजडः कथं वा
विन्देयमङ्घ्रिं तव वाक्सवित्रि ॥ ५४ ॥

समस्तवस्तून्यपि सन्ति मात-
स्त्वत्संनिधौ किंतु न मन्मनोऽस्ति ।
तत्र प्रमाणं जनिरेव मेऽद्य
तदप्यतस्त्वं कुरु संनिधौ ते ॥ ५५ ॥

पञ्चास्यषण्मुखचतुर्मुखनागराजाः
स्तोतुं न तेऽम्ब चरितं प्रभवन्ति किंचित् ।
एकाननः कथमहं तव शक्नुयां त-
त्स्तोतुं तथापि चपलं प्रसहस्व सूनोः ॥ ५६ ॥

लोकप्रसिद्धाब्धिततेस्तु मान-
माहुर्द्विलक्षाधिकयोजनानि ।
नाद्राक्ष्म नाश्रौष्म भवत्कृपाब्धे-
र्मानं पयोजातभवस्य जाये ॥ ५७ ॥

माला विभात्यम्ब तवाद्य कण्ठे
क्वचिच्च रक्ता क्वचिदच्छवर्णा ।
बिम्बाधरस्य प्रभया हि नासा-
मणेश्च कान्त्येति वितर्कयामि ॥ ५८ ॥

नागेन्द्रकुम्भावुत हेमकुम्भौ
किमम्ब कोकौ तव किं कुचौ वा ।
विवेक्तुमत्रास्ति न नोऽद्य शक्ति-
स्त्वमेव मातर्वद धातृजाये ॥ ५९ ॥

पयोजे कूर्मौ वा सुरवरशिरोभूषणमणी
तरू वा कल्पाद्यौ नतजनचयाभीष्टवरदौ ।
पदे वा मातस्ते न हि खलु विवेक्तुं हि विभवो
वयं तस्माच्छीघ्रं वद कमलजातप्रियतमे ॥ ६० ॥

जडोऽपि जगदम्बिके तव कृपायुतं वीक्षणं
प्रपद्य सुरनायकं जयति सत्वरं संपदा ।
मुखाम्बुजनिरर्गलप्रविगलद्वचोवैखरी-
विनिर्जितसुरापगास्मयभरश्च सञ्जायते ॥ ६१ ॥

शिवे त्वदङ्घ्रिपङ्कजप्रणम्रवाग्झरीजिता-
तुषारशैलगह्वरं जगाम जह्नुकन्यका ।
ततस्ततोऽपि तावकप्रणम्रकीर्तितर्जिता
शिवस्य शैलकन्यका जटाख्यदुर्गमाविशत् ॥ ६२ ॥

अव जगदम्ब सदा मां
सवमुख्यसुकर्मभिस्तुष्टे ।
नवनवकवित्वदान-
प्रवणे कंजातजन्मसुकृतमयि ॥ ६३ ॥

करुणापूरितनयने
वरुणादिदिगीशसेव्यपदपद्मे ।
अरुणाधरजितबिम्बे
तरुणाब्जमुखि प्रदेहि मम सौख्यम् ॥ ६४ ॥

शारदे तव पदं प्रसमीक्ष्य
प्राप्तुमस्य सदृशत्वमहो किम् ।
कण्ठदघ्नसलिले प्रतिघस्रं
पङ्कजान्युरुतपः प्रचरन्ति ॥ ६५ ॥

शारदे तव पदाम्बुजयुग्मं
ये स्मरन्ति मनुजा भुवि लोके ।
श्रीमतां च विदुषां धुरि गण्या-
स्ते भवन्ति न हि तत्र विचारः ॥ ६६ ॥

स्फुर जगदम्ब सदा मे
मानसपद्मे सरोजभवजाये ।
वरदाननिरतपाणे
वीणापाणेऽधरे शोणे ॥ ६७ ॥

राकाचन्द्रसदृक्षं
तव मुखपद्मं हृदम्बुजे स्मरताम् ।
कविता चेटी भूया-
त्तत्रापि न मेऽस्ति संदेहः ॥ ६८ ॥

कदाचिदपि यो नरस्तव पदाम्बुजं भक्तितो
विभावयति शारदे हृदयपङ्कजे तस्य हि ।
व्रजेयुरपि दासतां नृपवरास्तथा वाक्ततिः
सुधाशि तटिनीसखीवदनपद्मतो निःसरेत् ॥ ६९ ॥

विरिञ्चिहरिशंकरप्रभृतिनिर्जराग्र्यार्चिते
प्रणम्रजडतातमस्ततिविभेदसूर्यप्रभे ।
नमत्सुरसतीकचप्रविलसत्प्रसूनस्रव-
न्मरन्दतटिनीलसत्पदसरोरुहे पाहि माम् ॥ ७० ॥

न पूजिता त्वं कुसुमैर्मनोज्ञै-
र्न संस्तुता हृद्यपदैश्च पद्यैः ।
न संस्मृता हृत्कमलेऽपि जातु
तथापि मातर्दयसे जनेऽस्मिन् ॥ ७१ ॥

नैवाहमानीय सुमानि दिव्या-
न्याराधनं तेऽकरवं कदापि ।
तथापि मातः सहजानुकम्पा-
युतैः कटाक्षैः परिपाहि मां त्वम् ॥ ७२ ॥

ये प्राणरोधप्रमुखान् प्रयत्नान्
कुर्वन्ति लोकाः स्वसमीहिताय ।
तेनैव जानन्ति वर प्रणामं
तवाम्ब कल्पद्रुमबद्धसख्यम् ॥ ७३ ॥

अव्याजकारुण्यमयि प्रसीद
सुव्याहृतीनां ततिमाशु यच्छ ।
नव्यानि काव्यानि करोमि मातः
कव्यादवैरिप्रमुखामरेड्ये ॥ ७४ ॥

यावद्वाचां सवित्रि प्रणतजनवचोदानबद्धादरे ते
पादाम्भोजं प्रणन्तुं कलयति धिषणां जन्ममूकोऽपि लोकः ।
तावद्देवेन्द्रदत्तप्रवरमणिगणा बद्धपीठस्य मध्या-
दुत्थायाशु प्रधावत्यमरगुरुरहो मामयं जेष्यतीति ॥ ७५ ॥

यस्त्वामिन्दुनिबद्धदिव्यमकुटां शुक्लाम्बरालंकृतां
मुद्रापुस्तकमालिकामृतघटान् संबिभ्रतीं ध्यायति ।
तस्यास्यात्सरसा सुवर्णघटिता सालंकृता वाक्तति-
स्तूर्णं निःसरति प्रयत्नरहिता निःसंशयं भारति ॥ ७६ ॥

पापीयानिति संजहासि करुणावारांनिधे शारदे
सर्वाघौघपयोधिबाडबशिखे त्वं मामनाथं यदि ।
तर्ह्येतादृशपापकोटिसहितं सर्वैश्च दूरीकृतं
को वा मां परिपालयेत्कमलजप्राणप्रिये ब्रूहि मे ॥

भक्तिहीन इति मां जहासि किं
मातरद्य जलजासनप्रिये ।
संत्यजन्तु भुवि तर्हि मातर-
स्तद्वदेव निजकुक्षिजान् सुतान् ॥ ७८ ॥

कन्यां कुलशैलपते-
मान्यां मुरवैरिमुख्यदेवततेः ।
नौकां भवाम्बुराशे-
र्नौम्यहमनिशं शशांकशिशुशीर्षाम् ॥ ७९ ॥

कांचन काञ्चनगर्व-
न्यक्कारधुरीणदेहकान्तिझरीम् ।
कमनीयकवनदात्रीं
कमलासनसुकृतसन्ततिं कलये ॥ ८० ॥

चम्पकसुमानि मात-
र्नूनं नासासदृक्षतां गन्तुम् ।
सततं मालाव्याजा-
त्सेवन्ते पङ्कजातभवजाये ॥ ८१ ॥

तिष्ये युगे संघगता हि शक्ति-
रितीव सम्यक् परिचिन्त्य देव्याः ।
नासासदृक्षत्वमहोऽधिगन्तुं
मालात्वमापुः खलु चम्पकानि ॥ ८२ ॥

कटाक्षजितनीलाब्जा
करिकुम्भनिभस्तनी ।
करोतु मम कल्याणं
कमलासनकामिनी ॥ ८३ ॥

ज्वरादिनिखिलामयान् करुणया गिरामम्बिके
विनाशय विभावरीपतिसमानवक्त्राम्बुजे ।
स्वरादिभुवनाधिपप्रणुतपादपाथोरुहे
करादृतसुधेऽनिशं दिश सुखं जनानां मुदा ॥ ८४ ॥

वाताहताब्धिलहरीततितौल्यभाजो
वाचः प्रयत्नमनपेक्ष्य मुखारविन्दात् ।
वादेषु यत्करुणया प्रगलन्ति पुंसां
वाग्देवता भवतु वाञ्छितसिद्धये सा ॥ ८५ ॥

धातुः पुण्यततिः काचि-
द्वाचां धाटीं दधातु मे ।
यां दृष्ट्वा लज्जितो भूया-
त्सुराचार्योऽपि तादृशीम् ॥ ८६ ॥

तनुजितगाङ्गेयरुचिः
करधृतरुद्राक्षमालिकाकुम्भा ।
तनुतात्तामरसासन-
जाया जाड्यौघवारणं शीघ्रम् ॥ ८७ ॥

मतिजितसुरगुरुगर्वान्
प्रकुर्वतीं शीघ्रमेव पदनम्रान् ।
कलये हृदि जगदम्बां
करपद्मलसत्सुधाकुम्भाम् ॥ ८८ ॥

इति श्रीमत्परमहंसेत्यादिसमस्तबिरुदाङ्कित श्रीजगद्गुरु शृङ्गगिरि श्री सच्चिदानन्दशिवाभिनवनृसिंहभारतीस्वामिभिः शृङ्गपुर्यो श्रीशारदासन्निधौ नवरात्र्युत्सवसमये विरचितं

शारदास्तोत्रम्

समाप्तम् ।

॥ श्रीः ॥

॥ शारदास्तोत्रम् ॥

शिशुमिव पदनतलोकं
परिरक्षामीति बोधनायैव ।
अङ्के निधाय बालं
भातीयं पङ्कजातभवदयिता ॥ १ ॥

पुराणवस्त्राणि न धारयामि
नवाम्बराण्येव तु धारयामि ।
इति प्रबोधाय जनस्य नूनं
नवाम्बराण्येव दधाति वाणी ॥ २ ॥

एकमेवाम्बरं वाणि
विरूपं च वदन्ति हि ।
नवाम्बराणि धत्से त्वं
सुरूपाणि कथं वद ॥ ३ ॥

आकाशवत्सर्वगतश्च नित्य
इत्यादि वेदेऽम्ब किलाम्बरस्य ।
प्रत्नत्वमेकत्वमपि प्रसिद्धं
कथं नवत्वं समभूदमुष्मिन् ॥ ४ ॥

हंसैरेव परैः सेव्या
नाहमन्यैर्जनैरिति ।
प्रबोधनकृते मातः
हंसं वाहं करोषि किम् ॥ ५ ॥

हंसे हि शब्दे किमु मुख्यवृत्त्या
स्थिताहमेवेति विबोधनाय ।
विभासि हंसे जगदम्बिके त्व-
मित्यस्मदीये हृदये विभाति ॥ ६ ॥

हंसो बाह्यान्धकारप्रदलनचतुरो ह्यहि मोदप्रदायी
पद्मानामेष मेऽन्तःस्थिततिमिरततेर्वारयित्र्याश्च रात्रौ ।
अप्यामोदप्रदात्र्या नतहृदयसरोजातपङ्क्तेरधस्ता-
द्भूतो हीत्येव बोधं रचयितुमिव किं हंसमारोहसीशे ॥७॥

वृषं पुरस्तात्कुरुषे किमद्य
वृषप्रदानाय नमज्जनेभ्यः ।
द्रुतं पयोजन्मभवप्रमोद-
पयोधिराकाशशिबिम्बपङ्क्ते ॥ ८ ॥

शार्दूलचर्म परिवीक्ष्य भवाङ्गसंस्थं
भीतः पलाय्य तवसन्निधिमागतः किम् ।
उक्षाधिपः सरसिजासनधर्मपत्नि
ब्रूह्यद्य संशयनिमग्नमतेर्ममाशु ॥ ९ ॥

कर्तुमात्मनि सार्थां किं
वृषेन्द्रः पुर एतु नः ।
इत्यादिकां श्रुतिं वाणि
पुरस्तात्कुरुषे वृषम् ॥ १० ॥

वृषभो वृषभो नोचे-
त्कथं तव पदाम्बुजम् ।
वाणि सेवितुमर्हः स्या-
त्तस्माद्वृषभ एव हि ॥ ११ ॥

शिखिसूर्यचन्द्रमुख्या-
नहमेवास्थाय पालयामीदम् ।
जगदिति विबोधनार्थं
वागीश्वरि भासि शिखिनमास्थाय ॥ १२ ॥

शंभौ सन्ति शशाङ्कसूर्यशिखिनो नेत्रापदेशात्सदा
सागर्भ्यं त इमे निरीक्ष्य गिरिजानाथस्य मातस्त्वयि ।
वक्त्रारक्तपटीसुवाहमिषतः सेवां सदा कुर्वते
मोदादेव हि तेन चात्र विशयः कश्चिद्विरां देवते ॥ १३ ॥

शिखिवच्छुद्ध एवेति
नाम्नैवाह यतः शिखी ।
तस्मात्त्वद्वाहता चास्य
युक्तैव विधिवल्लभे ॥ १४ ॥

शिखी मुण्डी जटीत्याद्याः
सर्वे त्वत्सेवका इति ।
द्योतनाय शिखी किं वा
मातस्त्वामेव सेवते ॥ १५ ॥

निशम्य संप्रेषितवान् मयूर-
मुद्धर्ष इत्येव पितृष्वसुः किम् ।
षडाननो ब्रूहि गिरां सवित्रि
नम्रस्य संदेहयुजो ममाशु ॥ १६ ॥

केका न पूजयेयुस्त्वां
भुवनेऽस्मिन् महोत्सवे वाणि ।
इति नाम्नैव हि वक्तुं
भाति त्वत्सांनिधौ केकी ॥ १७ ॥

विनतातनूद्भवत्वं
प्रकटं प्रभवेद्विनत्यैव ।
इति बुद्धया खगराट् किं
विनतस्त्वत्पादपद्मयोर्वाणि ॥ १८ ॥

मानसविहरणशीलां
देवीं त्यक्त्वान्यदेवतासेवा ।
नैवोचितेति खगरा-
ड्वहति त्वां तादृशीं नूनम् ॥ १९ ॥

सुवर्णनीकाशभवत्प्रतीक-
कान्तेः परिष्वङ्गत एव सार्धा ।
सुपर्णतेत्यात्मन आकलय्य
खगेट् करोत्यम्ब तवाङ्घ्रिसेवाम् ॥ २० ॥

विष्णौ वीक्ष्य जडाधिवासमथ च स्वामित्रशायित्वम-
प्यण्डोद्भूतपतिर्विहाय तमिमं विज्ञानरूपामयम् ।
त्वामेवाद्य निषेवते खलु मुदा वाग्देवि युक्तं च त-
त्को वा शत्रुसहासिकां हि सहते लोकेषु विद्वज्जनः ॥

भूताकाशचरेट् त्वमेव भुवने सिद्धं हि का तेन मे
बुद्धिश्चाभवदित्यवेत्य खगराण्णूनं गिरां देवते ।
हार्दाकाशचराधिपत्यमपि मे भूयादितीच्छावशा-
त्तत्प्राप्त्यै तव पादपङ्कजयुगीसेवां करोत्यादरात ॥

लोके होकः पक्षः
　शुक्लश्चान्यश्च कृष्ण एवेह ।
द्वावपि शुक्लौ पक्षौ
　धत्ते गरुडः किमम्ब तव वाहः ॥ २३ ॥

हस्तान्तरस्थपरशुं
　शंभोर्भूषार्थमाहृतान्नागान ।
दृष्ट्वा भीतो हरिण-
　श्चरणं शरणं जगाम तव वाणि ॥ २४ ॥

समाश्रयेयं यदि पुष्करस्थ-
　मब्जं तदास्यात्पतनं हि दर्शे ।
ममेति मत्वा मृगशाबकोऽयं
　पदाब्जमेवाश्रयते तवाम्ब ॥ २५ ॥

पिबेयुरपि मां सुरा यदि वसामि चन्द्रे तदे-
　त्यपायरहितं पदं जिगमिषुश्चिरं संचरन् ।
अपायवचनोज्झितं तव पदाब्जयोरन्तरं
　विलोक्य मृगशाबको वसति तत्र वाग्देवि किम ॥

लालयति वाणि किं त्वां
पश्चास्यस्कन्धमारोप्य ।
युक्तमिदं भ्रातृणां
सोदर्यालालनं लोके ॥ २७ ॥

नाथस्यापि ममानिवेद्य हरिणः सेवां कथं प्रातनो-
द्वाग्देव्याश्चरणाब्जयोरिति रुषा सारङ्गबालं भृशम् ।
त्वा शीघ्रपलायनोत्सवपरं सेवां करोत्यादरा-
दृश्येशः स्वयमित्यवैमि करुणावारांनिधे शारदे ॥ २८ ॥

विष्ण्वर्धत्वात्पालकत्वं ममास्ते
संहर्तृत्वं नैजमेवास्ति किंतु ।
स्रष्टुर्भावो वाणि नास्तीति मत्वा
तत्प्राप्त्यै त्वां सेवते पञ्चवक्त्रः ॥ २९ ॥

उन्नम्य पादद्वितयं तुरङ्गो
वदन्नितीवास्ति गिरां सवित्रि ।
विलङ्घ्य तां किं सरिदीश्वरोऽय-
मुत्प्लुत्य गच्छेयमथाम्बरं वा ॥ ३० ॥

पदे पदे दानववश्यता मे
भवेच्छचीनाथसमीपवासे ।
उच्चैःश्रवा इत्यधिगम्य मात-
स्तवाङ्घ्रिसेवां प्रकरोति किं वा ॥ ३१ ॥

कुरङ्गवेगस्तव दृष्टपूर्व-
स्तुरङ्गवेगं परिपश्य वाणि ।
इतीव गर्वादधिगम्य मात-
स्तुरङ्गमस्त्वां परिसेवते किम् ॥ ३२ ॥

विहङ्गं कुरङ्गं तुरङ्गं च वाहं
विधायाशुगं श्रान्तिमासाद्य किं त्वम् ।
गजं मन्दगं वाहमद्यातनोषि
प्रणम्रस्य मे ब्रूहि वाचामधीशे ॥ ३३ ॥

जम्भारौ कौशिकत्वं ह्यथ च तदनुजे वीक्ष्य सम्यग्घरित्वं
त्यक्त्वा ह्रीसाध्वसाभ्यामयमिभकुलराट् तौ शरच्चन्द्रशुभ्रः ।
इन्द्रोपेन्द्रादिसेव्यामपि सकलसुराराध्यपादारविन्दां
त्वामेवातिप्रमोदात्कमलजदयिते सेवते नूनमेतत् ॥ ३४ ॥

नतेष्टदानाय सदा जलार्द्र-
करास्बुजा त्वं यत एव वाणि ।
तस्मादिभोऽप्येष तवाङ्घ्रिसंगा-
द्दानाम्बुसंसिक्तकरो विभाति ॥ ३५ ॥

मत्पादाब्जप्रणम्रं नरमतितरसा सेवते चेभमुख्या
लक्ष्मीर्हस्ताग्रराजद्वरकनकमयस्रग्धरेत्येव बोधम् ।
कर्तुं हस्ताग्रराजद्वरकनकसरं नागराजं प्रधत्से
वाणि प्रब्रूहि किं त्वं कमलजहृदयाम्भोजसूर्यप्रभे मे ॥

त्यक्षामि नैव रागं
कालत्रितयेऽपि नम्रवर्गेषु ।
इति बोधनाय वाणी
रक्तसुमानां त्रयं धत्ते ॥ ३७ ॥

एकः शुकः प्रसिद्धोऽस्ति
पाराशर्यसुतः किल ।
शुको परस्तु को ब्रूहि
शारदे प्रणताय मे ॥ ३८ ॥

पद्मासनस्थे सरसीरुहोत्थ-
जाये वस त्वं हृदये सदा मे ।
तेनाहमाशाः सकला जयेयं
न तत्र संदेहलवोऽस्ति मेऽद्य ॥ ३९ ॥

इति श्रीमत्परमहंसेत्यादिसमस्तविरुदाङ्कित श्रीजगद्गुरु शृङ्गगिरि श्री सच्चिदानन्दशिवाभिनवनृसिंहभारतीस्वामिभिः शृङ्गपुर्यां श्रीशारदासन्निधौ नवरात्र्युत्सवसमये विरचितं

शारदास्तोत्रम्

समाप्तम् ।

